एक भारत

ई. पी. भरत पिषारटी

कामधेनुप्रकाशनम्

एकभारतम्

(नाटकम्)

मूल्यम् : रू. ५-००

ई. पी. भरतपिषारटी

ĒKABHĀRATAM

(Sanskrit Drama)

By E. P. BHARATA PISHARODI

Second impression, (Revised) 15th October 1978

Copies 1000

Price : 5-00

Publishers:

KAMADHENU PUBLICATION

P. O. Eranellur, Trichur Dt.,

Kerala, S. India.

Copy-right, reserved by the author

Printed at;

Immanuel Press, Kunnamkulam.

SYNOPSIS·

The plot of the drama is purely imaginary and is not based on any Puranic story. All the characters in it are personification of various natural features of India like Himalaya,Ganga ocean, desert, drought, diseases and so on·

The mountain Himalaya is the father of two daughters. Sindhu the elder and Ganga the younger. Sindu was converted to Islam while rendering her service in Pakistan. Ganga was given in marriage to the ocean· But she is not attuned to her husband His immense dimensions, roaring voice, loud gaffaws with arms raised whenever she approached him, all these displeased her. But Himalaya valued the granduer and depth of his son-in law. All these characters are striving for the prospirity of India.

Here, the desert is the villain With his wife mirage, son storm friends epidemics he strives to destroy the country· At last the hero and villain come in to clash. Being unable to stand against the ocean the desert becomes defeated and India becomes verdant everywhere.

प्रास्ताविकम्

एकभारतं नाम नाटकमिदमितःपूर्वं कामधेनोरङ्गतया प्रकाशलेशं प्राप्तम् । भारतविद्यापीठात् पत्रव्यवहारद्वारा संस्कृतमधीयानानां समेषामपि नाटकमिदं न खलु नैव परिचितमस्ति ।

नाटकस्यास्येतिवृत्तं, नेतिहासादुद्धृतं, नापि पुराणात् समाकलितम् । केवलभावनाकलाकलितस्यास्य समालम्बः सङ्कल्प एवेति प्रथमत एवात्र निवेदनीयमास्ते ।

इतिवृत्तमस्यैवमत्र संक्षिप्यते—

हिमालयस्य पर्वतकुलकूटस्थस्य द्वे दुहितरौ स्तः । ज्येष्ठा सिन्धुः कनिष्ठा गङ्गा च । सिन्धुस्तु माहम्मदजनसंसर्गात्तेषां धर्ममङ्गीचकार । एवं सा स्वजनभ्रष्टा पक्किस्थानप्रदेशेन सञ्चरति । कनिष्ठां तनयां गङ्गां तु पुत्रीवत्सलः स पिता सागराय ददौ । सर्वोन्नतस्स पिता गभीराशयं विशालहृदयं स्वजामातरं सम्यग् जानात्येव । किन्तु, स बहिश्चलः सततमस्थिरप्रकृतिश्च वर्तते । यदा यदा गङ्गा स्वभर्तारं उपगच्छति तदा तदा स बाहुदण्डं उद्यच्छन् फेनपुञ्जमुद्गिरन् अट्टहासमारचयन् तां प्रहर्त्तुमिवाभिगच्छति । गङ्गा तु भीता निराशा निरालम्बा पितुरभिलाषानुवर्तिनी सर्वं विषह्य स्वानि भाग्यानि निन्दन्ती कालं यापयति । एवंविधासु विषमविक्लवावस्थास्वपि सर्वेऽप्येते हिमालयसागरादयः भारतभूमिमेकीकर्तुं सम्पत्सम्पन्नां च विधातुं अविरतमेकतानहृदयाः प्रयतन्ते ।

मरुरत्र प्रतिनायकः । मरीचिका तस्य धर्मपत्नी । प्रकम्पनः पुत्रः । अतिवृष्टिर्वधूः । दुर्भिक्षमहारोगादयस्तस्य

सखायश्च । सर्वेऽप्येते भारतमखिलमसस्यश्यामलं अप्राणिसञ्चारं च कर्तुं उद्युञ्जते ।

अन्ते पक्षप्रतिपक्षयोः सङ्घर्षः समापतति । घोरे समरे वर्तमाने नायकपक्षो विजयते । प्रतिपक्षः पराजयं च भजते ।

एवं अमानुषाणां अचराणां मानुषीकरणेनापादचूडं विलक्षणमपि सलक्षणमिदं नाटकं इतिवृत्तेऽन्यादृशमिति रसिकतायामद्वितीयमिति प्रयोगविज्ञाने समञ्जसमिति दृश्यप्रबन्धेऽभिनवमिति देशीयोद्ग्रथने समुत्तेजकमिति अदोषैकदर्शां दोषज्ञानां चर्वणार्थमास्वादनार्थं च सप्रश्रयं अवतार्यते ।

एरनेल्लूर, ग्रन्थकर्ता

10—10—1978.

CHARACTERS

हिमालयः — The famous mountain of India.
The father of Ganga, father-in-law of the sea.

समुद्रः— The sea. (Here the bay of Bengal)
Husband of Ganga, son-in-law of Himalaya.

मरुः— The desert.
Villain- Husband of mirage- Father of storm.

प्रकम्पन— storm.
Only son of desert and mirage

महारोगः— Tuberculosis combined with some kind of skin disease.

दुर्भिक्षम्— Poverty.
Both are the comrades of desert in destruction of the country.

गङ्गा— The holy river of India.
Daughter of the Himalaya, wife of the sea.

गोदावरी
सिप्रा } Rivers
पर्णाशा

Comrades of Ganga in protection of India.

मरीचिका Mirage
wife of desert the mother of storm.

भारतमाता The deity of India.

॥ एकभारते प्रथमोऽङ्कः ॥

नान्दी

1 ब्रह्मेत्याहुर्यदीयामविरतिमृषयो राजसीं सर्गशक्तिं
स्थित्यर्थां सत्त्वशक्तिं सकलसुखकरीं विष्णुरित्यामनन्ति ।
धत्ते संज्ञां यदीया मृड इति विषमा तामसी ध्वंसशक्तिः
नित्यः सत्यः स मूर्तित्रयमयविभवः पातु वो विश्वरूपः ॥

(नान्द्यन्ते प्रविशन्ति धृतकुमारिकारूपाः एककण्ठतालपदं विन्यासं-गायन्त्यो नद्यः ।)

सघगानम्

भुवन पावनी—भरत मेदिनी
विजयतां कलयतां भविकमखिल तनुभृताम् ।
तुहिन शैल रजत मुकुट तल्लजाभिशोभिनी ।
नद नदी कदंब धवल हार हृदयहारिणी
(भुवन पावनी-)

उपरि पुष्कर—नित्यभास्वरम्—
तव तनोति विरतिहीनमवनमुदितभास्करम्
मृदुल मलय पवन मन्द वीजनाद्विहर्षिणी
विवश निखिल जन्तुजाल जीवनाभिवर्षिणी ।
(भुवन पावनी-)

टीका

नान्दी=नाटकादीनामादौ क्रियमाणा आशीर्वादरूपा प्रार्थना ।
पद्यम् 1. सारः— ऋषयो यस्य अविरामां रजोमयीं सर्गशक्तिं ब्रह्मा इति आहुः, विश्वस्थितिकारिणीं सुखमयीं सत्त्वशक्तिं विष्णुः इति गणयन्ति, यस्य तमोमयी विषमा ध्वंसशक्तिः मृड

हृदय विमलतां—स्फुटयतीव ताम्
स्फटिक विशद दीर्घिकागणस्तवेह सुमहिताम् ।
परिचरत्यनर्घविकच सुमगणैश्च मधुरिमा-
ममल मञ्जुल स्मितैश्च शरदनूनमधुरिमा ।
(भुवन पावनी-)

जलनिधिर्भुजे—मौक्तिकीं निजे
दधदजस्रमर्चतीव तावकांघ्रिपंकजे ।
तरु कदंब मृग निरन्तराद्रि विपिन शालिनी
ऋषि गणाभिगीत पूत महिम भार भासिनी ।
(भुवन पावनी-)

इति संज्ञां धत्ते, स विश्वरूपः वः पातु ।

ब्राह्मा+इति+आहुः+यदीयां+अविरतिं+ऋषयः । विष्णुः+इति+आमनन्ति । आहुः=वदन्ति । यदीयां=यस्य । अविरतिं=अविरामां । आमनन्ति=मन्यन्ते । धत्ते=दधाति । विषम×सम । मृडः=शिवः । ध्वंसः=नाशः । मूर्तित्रयमयः विभवः यस्य सः । सृष्टि स्थिति संहारात्मिकाः तिस्रो मूर्तय एव तस्य वैभवं इत्यर्थः ।

संघगानम्-'भुवनपावनी...तनुभृताम् ।' सारः— भारतभूमिः विजयताम् । सा अखिलजनानां शुभं विदधातु । कलयतां =विदधातु, तनोतु । भविकं=शुभं । तनुभृतां= (त. पु. ष. ब) =जनानां ।

'तुहिन... हारिणी ।' सारः— सा हिमालयरूपेण उत्कृष्टरजतकिरीटेन नितरां शोभते । तथा नदीसमूहरूपैः शुभ्रहारैः

(गानमन्तरा प्रविशति गंगा)

गंगा— (विलोक्यात्मगतं) अहो! अयमत्र गानमेलावसरः। ममागमनेऽत्र विलंबः समापतितः। अथवाऽस्यां कर्मभूमौ सर्वत्रापि स्वातन्त्र्य दिनमुद्घुष्यते खलु।

गोदावरी— (विलोक्य) अये! ज्येष्ठा गंगा समागता।

गंगा— वत्से, अप्यवसितो युष्माकं कार्यक्रमः?

गोदा— नन्ववसित एव। तथाप्यस्मत्प्रतीक्षा न विफलीकृता।

मनोहारणी च वर्तते। तुहिनं=हिमं। रजतं=रूप्यं। तल्लजः प्रकाण्डं इत्येतौ उत्कृष्टार्थे प्रयुज्येते। मुकुटतल्लजः=उत्कृष्टं मुकुटं। पुरुष प्रकाण्ड=उत्कृष्टः पुरुषः। नदः=जलप्रवाहः। कदंबः=समूहः। धवलहारः=शुभ्रमौक्तिकमाला।

'उपरि...भास्करम्।' सारः- सूर्योदयेन नित्यभास्वरं आकाशं तव अविरतं रक्षणं कुरुते। पुष्करं=आकाशं। तनोति=करोति। विरतिहीनं=विरामरहितं। अवनं=रक्षणं। उदितः=भास्करः यस्मिन् तद्।

'मृदुल...वर्षिणी।' सारः- मलयानिलस्य वीजनसुखमनुभूय सन्तुष्टा सा सकलजीविनाँ जीवितं जलं च वितरन्ती वर्तते। जीवनात्+विहर्षिणी। जालः=समूहः जीवनं=जीवः जलं च।

'हृदय...महिताम्।' सारः— इह भारते स्फटिकस्वच्छ तटाका तव महितं मनोनैर्मल्यं स्पष्टीकुर्वन्ति इव। इह=अत्र। दीर्घिकागणः+तव+इह। दीर्घिका=तटाकः।

गंगा—कथमिव?
गोदा—यतोऽन्ते सम्मिलिताऽसि ।
गंगा—अये कीदृशोऽभूदत्रत्य उत्सवः । श्रोतुमुत्सुकास्मि ।
गोदा—तर्हि शृणु ।

'परि चर...मधुरिमा' । सारः- इह उत्कृष्टविकसित-पुष्पसमूहैः वसन्तः इमां भारतभूमिं परिचरति । अन्यूनमाधुर्य-वती शरत् निर्मलमधुरमन्दहासैश्च इमां सेवते । परिचरति=सेवते अनर्घ=उत्कृष्टं । विकच=विकसित । मधुः+इमां । मधुः=वसन्तः । शरद्+अनूनमधुरिमा=अन्यूनमाधुर्यवती । मधु-रिमा=माधुर्यं ।

'जलनिधिः...पकजे ।' सारः समुद्रः स्वहस्ते मुक्ता-मणीन् धृत्वा सर्वदा तावकचरणकमले अर्चतीव । निजे भुजे=स्वहस्ते । मौक्तिकीं=तरंगरूप मुक्ताहार । दधत्=दधानः, धरन् । अजस्रं=सदा । अंघ्रिः=चरणः ।

'तरु...भासिनी ।' सारः- तरुगणैर्निबिडैरद्रिभिः मृग-निबिडैः वनैश्च राजन्ती । मुनिजनगीतेन परिशुद्धमहिम्ना भासमाना च भारतमाता विजयताम् । निरन्तर=निबिड, अवकाशरहिता । पूत=परिशुद्ध ।

विलंबः=कालातिपातः । समापतितः=संभूतः । अपि+अवसितः । अपि=किम्? अपि कुशलं?=किं कुशलं? ननु+अवसितः । कथमिव=कथं? अत्रत्यः=अत्र संभूतः ।

2 धर्मः सभापतिरभूदखिलागमज्ञः,
रंगोऽभवच्च समता जनचित्तहारी ।
स्वातन्त्र्यमुन्नमितवच्छबलां पताकां,
सत्यं तथाकुरुत भाषणमर्थगर्भम् ।

गंगा— हन्त! असुलभोऽयमवसरो नष्टः । तथापीदं वो निवेदनीयमस्ति । सन्ति युष्माकमितोऽप्यधिकानि कर्तव्यानि । मया तु प्रतिजनपदं पर्यटन्त्या बह्ववलोकितमनुभूतं च । हन्त! भारतांबाया विचित्रोऽयमधुनातनो दशाविशेषः । तथाहि—

पद्यम्–2 बोदावरी कार्यक्रमे संबद्धान् विशिष्टातिथीन् परिचाययति । सारः— सकलशास्त्रपारंगतः धर्मः सभायां अध्यक्षपदमलंचकार । समत्वं जनहृदयाकर्षको रंग आसीत् । स्वातंत्र्यं वर्णशबलां पताकां उन्नमितवत् अर्थात् पताकोन्नमनकर्म स्वातंत्र्येण कृतम् । तथा सत्येन भाषणं च कृतम् । आगमः=वेदः । उन्नमितवत्=उन्नमयति स्म । शबला=विविधवर्णयुक्ता ।

वः=युष्माकं इतोऽपि=अस्मादपि । बहु+अवलोकितं ।

3 असारैर्जलधीकृते जनपदे मेघो वरीवृष्यते
देशानूष्मलितानशीतकिरणैर्दन्दह्यतेऽहस्करः ।
लक्ष्यन्ते निबिडाः परं जनपदा भूयोऽपि सान्द्रा जनैः
यन्नापेक्षितमस्ति यत्र ननु तत् तत्रैव पुञ्जीकृतम् ॥

पद्यम्–3 आसारैः...पुञ्जीकृतम् । सारः— भारते प्रतिग्रामं पर्यटनं कृतवती गंगा स्वानुभवं विवृणोति । यत्र प्रदेशे यद् न आवश्यकमस्ति तत्र तदेव सुलभं दृश्यते । इममाशयं आदिम-पादत्रयेणोदाहरति । यो नाम ग्रामः जलधारापातैः समुद्रसदृशः संजातः तस्मिन् ग्रामे मेघः पुनरपि वर्षति । ऊष्मलितान् देशान् सूर्यः स्वैरुष्णैः किरणैः पुनरपि दहति । तथा स्वतः सान्द्रा जन-पदाः अनुदिनं जायमानैर्जनैः पुनरपि सान्द्रा दृश्यन्ते । किं बहुना? यत्र यद् न अपेक्षितं वर्तते तत्र तदेव पुञ्जीभवति । आसारः= धारावर्षः । वरीवृष्यते=नितरां अथवा पुनः पुनर्वर्षति । अशी-तकिरणैः=उष्णरश्मिभिः । दन्दह्यते=नितरां अथवा पुनः पुन-र्दहति । अहस्करः=सूर्यः । लक्ष्यन्ते=दृश्यन्ते । निबिडाः= सान्द्राः । भूयोऽपि=पुनरपि । यद्+न+अपेक्षितं । तत्+ तत्र+एव ।

भणसि=वदसि । अस्मद्राष्ट्रं+ऋद्ध्या=समृद्ध्या । सिद्धिः =लाभः । समध्यासितं=समधिष्ठितं । त्वया+एव+असकृत् =अनेकशः, बाहुवारं । यत्सत्यं=सत्यमेव । पश्य+अस्माद्राष्ट्रस्य +आधुनिकीं ।

पर्णाशा— आह! सत्यभाषिणि गंगे किमेवं भणसि? स्वातंत्र्य-लाभादनन्तरं अस्मद्राष्ट्रमृद्ध्या सिद्ध्या च समध्या-सितमिति त्वयैवासकृत् कथितम्। किमस्मानधुना परिहससि?

गंगा— किमयं विषयः परिहासस्य? वत्से, यत्सत्यमस्माकं स्वातंत्र्यमुपलब्धम्। तथापि तदन्यूनं कर्तुमस्मिन् भारतवर्षे बहवः प्रमेयाः समाधातव्याः। पश्यास्मद्रा-ष्ट्रस्याधुनिकीं दशाम्:—

4 भाषा धर्म वसु प्रान्त वर्णादिभिरुपाधिभिः।
एकसूत्रोच्चितेष्वस्मास्वेकैकोपि विभाजितः॥

एवं च स्वातंत्र्येण विभक्तमपि विविधैरुपाधिभिर्बहुधाऽ-विभक्तं इमं भारतवर्षमेकीकर्तुं शक्ताः प्रशस्ताश्च कतिचन मार्गा मार्गणीयाः। तत्रैतौ प्रमुखौ। एकस्त्वान्तरोऽन्यो बाह्यश्च। अत्राद्यो नैसर्गिकः सनातनश्च यः खलु बाह्यप्रकृतिभिरयथातथी-कर्तुमशक्यः। पश्य,

---

पद्यम—4 सारः— वयं एकसूत्रे ग्रथिता अपि भाषाधर्मप्रान्तादि-भिर्हेतुभिः परस्परं विभक्ताः। वसु=धनं। उपाधिः=धर्मः, विशेषः। एकसूत्रोच्चितेषु अस्मासु एकैकः अपि। उच्चित=ग्रथित।

प्रशस्ताः = उत्कृष्टाः। मार्गणीयाः = अन्वेषणीयाः नैसर्गिकः = स्वाभाविकः। अयथातथीकर्तुं। एकः तु आंतरः अन्यः बाह्यः च।

5 लोकायालोकदात्री जयति दिविषदां भारती भारतेऽस्मिन्
प्रायः सर्वत्र सर्वा जनततिरिह संदृश्यतेऽध्यात्मनिष्ठा ।
आचारास्ते समन्तादपगतकलुषाश्चार्षसिद्धान्तमूलाः ।
एकैकाभिर्विभक्तास्तनुभिरपि सदा चित्तमस्माकमेकम्।।

द्वितीयस्तु जटिलः । यद्यस्माकमखिलैः कर्मभिस्तदर्थैरेव भूयते तर्हि स लघु समाधातुं शक्यः । समृद्धमन्नं सुलभं वस्त्रं सुदृढं भवनं च एकैकस्याप्यावश्यकं; प्रायशस्तन्निष्ठैव एकता दृढा भवति ।

सिप्रा— तथ्यमेव ज्येष्ठा भणति ।

मोदा— अये अविरतमिवास्याः कथितव्यम् प्रतिभाति ।

पर्णाशा— कथयत्वार्या ।

गंगा— अपिच किमु न श्रुतं युष्माभिः यत् किल भारतस्यैश्वर्ये बाधामापादयन्तः केचन भीमाकारा इह सर्वत्राहिण्डन्त इति ।

पद्यम्–5 सारः– बाह्यप्रकृतिभिः अन्यथाकर्तुमशक्यं भारतस्य नैसर्गिकमैक्यं गंगा विशदयति । लोकाय प्रकाशं ददती देवभाषा अस्मिन् भारते आसेतुहिमाचलं विजयते । अत्र सर्वेऽपि जनसमुदाया अध्यात्मनिष्ठा वर्तन्ते । आचारास्तु आर्षसिद्धान्ते अधिष्ठिता एव । एवं च वयं शरीरैर्विभिन्ना अपि अस्माकं हृदयं एकमेव । देवभाषा. आध्यात्मिकबोधक्षणस्वभावः, आचाराः, हृदयविकाराश्च अस्माकं स्वाभाविकमैक्यं वर्धयन्ति । ईदृशमान्तरबन्धं बाह्यप्रकृतिर्निहन्तुं न शक्नोति ।

आलोकः=प्रकाशः । दिविषदां=देवानां । प्राय.=प्रायेण । तति.=समूहः । अध्यात्मनिष्ठा=अध्यात्मिककार्येष्वधिष्ठिता ।

6 तेषां ननु प्रमुख एव मरुर्यदाज्ञां
मूर्ध्ना वहंत्यखिलनाशकराः कराला:,
वात्याऽतिवृष्टिरतिभीषणचक्रवात-
स्तीव्राभितापजननी मृगतृष्णिका च ।।

समन्तात्=सर्वत्र । अपगतकलुषाः=कालुष्यरहिताः । एकैकाभि विभक्ताः तनुभिः अपि ।

जटिलः=सङ्कुलः, विषमः । कर्मभिः तदर्थैः भूयते=कर्माणि तदर्थानि भवन्ति (भावे प्रयोगः) । लघु=द्रुतं । तन्निष्ठाः =तेषु अधिष्ठिताः । तथ्यं=सत्यं ।

अये...भाति=अस्या वक्तव्यं नावसितं, किञ्चिदवशिष्टमिव ज्ञायते । प्रतिभाति=ज्ञायते । बाधा=विघ्नः । आपादयन्तः= कुर्वन्तः । आहिण्डन्ते=अटन्ति, सञ्चरन्ति ।

पद्यम्–6 सारः— भारतस्यैक्ये बाधामुत्पादयन्तः के के वर्तन्ते इत्येतद् गंगा विशदीकरोति । तेषां विनाशकानां प्रमुखः मरुः। तस्याज्ञां वात्या अतिवृष्टिः चक्रवातः मरीचिका च मूर्ध्ना वहन्ति ।

यदाज्ञां=यस्याज्ञां । मूर्ध्ना=शिरसा । अखिलनाशकराः= सर्वसंहारकाः । कराला:=भीकराः । वात्या=प्रचण्डवातः । चक्रवातः=चक्राकृत्या परिभ्रमन् वायुः । मृगतृष्णिका=मरीचिका ।

क्लिन्नाः=जलार्द्राः ।मदुपान्तेषु=मत्परिसरेषु । अटन्त= चरन्तः ।

गोदा — सत्यमेवार्यया कथितम् । अधुना त्वतिवृष्ट्या क्लिन्नाः क्लिष्टाश्च केचन पाण्ड्याः मदुपान्तेष्वटन्तो दृश्यते । ते तु

7 भाण्डैर्महाप्रमाणैः कुञ्चितगात्राः सगृह्यमृगवृन्दाः ।
आबालादावृद्धाद् जना वलन्ते विशीर्णजीर्णपटाः ।।

सिप्रा— अस्ति च मदुपान्तप्रदेशेषु सर्वसंहारी प्रकम्पनपिता मरीचिकाजानिर्महामरुः । स तु मत्पार्श्वभूमिमसस्य-श्यामलामप्राणिसञ्चारां च कर्तुमुद्युक्त इव दृश्यते । यथा हि,

8 बाष्पप्रायास्तिग्मतिग्मांशुतप्ताः वात्याघातैर्दूरमुत्सारिताभ्राः ।
ज्वालाजालैः खेचरान् खेदयन्तः संदृश्यन्ते मारवास्ते प्रदेशाः ।

गंगा— वत्से सर्वमपि मया दृग्गोचरीकृतम् । वयं तु भारत-स्यैक्यतृष्णातो व्याकुलाः स्मः । इदं तु राष्ट्रं वर्णप्रा-

---

पद्यम्-7 सारः— गोदावरी स्वानुभवं प्रस्तौति । तस्याः तीरप्रदेशेषु पाण्ड्याः सञ्चरन्ति । तेषां शरीराणि बृहदाकारान् भाण्डान् समुह्य कुञ्चितानि अर्थात् भुग्नानि (नतानि) सन्ति । ते आबालवृद्धं गृह्यमृगगणैः सह जीर्णपटानि परिधाय पर्यटन्ति ।

मरीचिकाजानिः=मरीचिका जाया यस्य सः=मरीचिकाया भर्ता इत्यर्थः । यथा- जानकीजानिः=रामः । कौसल्याजानिः= दशरथः । असस्यश्यामलां+अप्राणिसञ्चारां ।

पद्यम्-8 सारः— सिप्रा स्वानुभवं विवृणोति । मत्परिसरेषु अत्यूष्मला मरुप्रदेशा वर्तन्ते । ते कठिनसूर्यकिरणसंतप्ताः सन्ति । चण्डवातानामाघातैः मेघान् दूरमुत्सारयन्ति । ते स्वीयज्वाला-भिः खगान् तारकाश्च खेदयन्ति ।

न्तादिभिः शतधा विभक्तम् । तदप्येकमेतदविभक्तमस्माकं प्रतिभाति । तदैक्यस्य विघ्नमापादयन्त एते रन्ध्रप्रहारिणः सर्वेऽप्युच्चाटनीयाः ।

9 यं वा मरुः स्वबलतः खलतीकरोति
तं कुर्महे स्थलममुं पुलकांकुराक्तम् ।
चण्डातिवृष्टिरपि यं जलधीकरोति
तं तन्महे लघु पिपीलिकयाऽपि गम्यम् ॥

ततः सर्वा यूयमधुना भारतस्यैकतार्थमेकतानहृदयाः साधुकृतकर्तव्या भवत ।

तिग्मः=अत्युष्णः । तिग्मांशुः=सूर्यः । दूरं उत्सारितानि अभ्रणि यैः ते । अभ्रं=मेघः । खेचरान्=गगनचारिणः पक्षिणः=नक्षत्राणि च । मारवाः=मरुप्रदेश संबन्धिनः । दृग्गोचरीकृतं=दृष्टम् । ऐक्यतृष्णातः=ऐक्याभिलाषात् । तदपि=तथापि । एकं+एतद् । रन्ध्रप्रहारिणः=अवसरे प्रहर्तुमुद्यताः । उच्चाटनीयाः=निष्कासनीयाः ।

पद्यम्–9 सारः— मूरुः यं प्रदेशं स्वशक्या वृक्षलताद्विरहिं करोति, तं वयं सस्यादिकान् प्ररोप्य रोमाञ्चितान् कुर्मः । तथा यं देशं अतिवृष्टिः समुद्रसदृशं करोति तं पिपीलिकाभिरपि चरितुं शक्यं तन्मः । स्वबलतः=स्वशक्या । खलतीकरोति=लुप्तसस्यं करोति । खलतिः=लुप्तकेशः । आक्त=सहित । चण्ड=भीकर । पिपीलिका=ant

एकतार्थं=ऐक्याय । एकतानहृदया=एकाग्रचित्ताः । साधुकृतकर्तव्याः=सम्यक् कर्तव्यं कृतवत्यः ।

10 कृष्णा त्वान्ध्राननूनाधिकजलसुभगान्, नर्मदा हैहयांस्तान्,
कावेरी चोलपाण्ड्यान् कलयतु, मुरला केरलान् केरपूर्णान् ।
ब्राह्मावर्तान् शतद्रुः सरिदथ, कपिशा चोल्कलान् दण्डकान्तान्,
गोदावर्य, प्यवन्तीन् समधिकविभवान् निर्मलापा च सिप्रा ।

गोदा— यथाऽदिशत्यार्या ।

गंगा— अपि चास्मिन् कर्मणि पिता पितृव्याश्चास्मन्मार्गदर्शकाः
साहाय्यं करिष्यन्ति । तथा हि,

पद्यम्-10 सारः— ज्येष्ठा गंगा स्वकनिष्ठाः कृष्णानर्मदाद्याः स्वस्वकर्तव्येषु नियुंक्ते । कृष्णा अन्यूनाधिकजलदानेन आन्ध्र-प्रदेशं सुभगं करोतु । नर्मदा हैहयप्रदेशं कावेरी चोलपाण्ड्य प्रदेशं च अनूनाधिकजलसुभगं करोतु । तथा मुरला केरलदेशं केरवृक्षैः समृद्धं कलयतु । अथ शतद्रुनदी ब्रह्मावर्तान्, कपिशा उल्कलान्, गोदावरी दण्डकारण्यपरिसरान् तथा निर्मलजला सिप्रा अवन्तीन् च समृद्धविभवान् करोतु ।

हैहयान्+तान् । च+उल्कलान् । गोदावरी+अपि+अवन्तीन् । निर्मलाः आपः यस्याः सा=निर्मलापा । आपः=जलम् । 'अप्' शब्दः बहुवचने एव प्रयुज्यते । अस्य बहुवचनरूपाणि यथा—आपः अपः अद्भिः अद्भ्यः अद्भ्यः अपां अप्सु । आदिशति=आज्ञापयति । पितृव्याः=पितुः भ्रातरः।

11 रोगान् पिता ह्योषधिभी रुरुत्सुः
वात्यां च विन्ध्यस्तरुबाहुदण्डैः ।
चण्डातपं चन्द्रिकया समानं
कुर्याच्च सह्यो मलयानिलेन ॥
(एकैका नद्यः प्रतिज्ञां कुर्वन्ति)

12 गंगा— कुर्वे सर्वान् प्रदेशान् फलनिवहसमा-
भुग्नशाखद्रुमाढ्यान्
गोदा— प्रत्याकृष्टैः प्रवाहैः परिमितसलिलान्
स्वावकाशाम् विदध्याम् ।
सिप्रा— क्षेत्राण्यक्षामसस्यान्यविफलकृषक-
व्रातवाञ्छानि चाहं,
पर्णशा· यत्रेष्टं तत्र पाथोभरणविधिषु चा
प्यप्रमत्ता भवेयम् ॥

॥ यवनिका ॥

पद्यम्–11 सारः— कथं पिता पितृव्याश्च साहाय्यं करिष्यन्तीति विव्रियते । पिता हिमालयः ओषधिभिः रोगान् रोद्धुमिच्छति । विन्ध्यः उन्नतैः तरुबाहुभिः चण्डवातं रुन्धन् वर्तते । सह्यस्तु मलयानिलेन चण्डातपं चन्द्रिकया समानं च कुर्यात् । ओषधिभिः+रुरुत्सुः=ओषधिभी रुरुत्सुः । क्वचित् रेफात् पूर्वो विसर्गो लुप्यते । तत्पूर्वः स्वरः दीर्घो भवति च । हरिः+रमते =हरी रमते ।

पद्यम्-12 सारः— अहमिदं करोमि, अहमिदं करोमि इति प्रतिज्ञां सर्वाः कुर्वन्ति। गंगा प्रतिजानीते—अहं मत्परिसरेषु वृक्षान् फलभरनम्रान् करिष्यामि। गोदावरी—अहं स्वकीयेष्ववकाशेषु अतिवेगं जलप्रवहं प्रतिनिवर्त्य सलिलव्याप्तिं परिमितां करिष्ये। सिप्रा— अहं क्षेत्रेषु सस्यानि संवर्ध्य कर्षकाणां अभिलाषान् सफलान् कुर्याम्। पर्णाशा— अहं आवश्यकेषु स्थलेषु जलसंभरणे दत्तावधाना च भवेयम्।

फलानां निवहैः शाखाभिः च सहितैः द्रुमैः आढ्यान्। समाभुग्नः=आकुञ्चितः, आनम्रः। आढ्य=युक्त। प्रत्याकृष्ट=प्रतिनिवर्तित। परिमितं सलिलं येषु तान्। क्षेत्राणि+अक्षामसस्यानि+अविकल...। अक्षामाणि सस्यानि येषु तानि। अक्षाम=अक्षीण। व्रातः=समूहः। वाञ्छा=आग्रहः। अविकलाः कृषकव्रातवाञ्छाः येषु तानि। पाथस्=जलं। च+अपि+अप्रमत्ता=प्रमादरहिता।

एकभारते द्वितीयोऽङ्कः

(ततः प्रविशति रोषारुणाक्ष उच्चैस्तरमारटन् मरुः)

मरुः- क इमे पाटच्चराः । कस्तेषां विक्रमः । सर्वेऽप्येकीभूताः भारतवर्षाद् मां उत्सारयितुमुत्सहन्ते । (किञ्चिद्विचिन्त्य) अस्ति मे मरीचिका महिषी । सा तु सर्वानपि वशीकर्तुं प्रभवति । (नेपथ्याभिमुखमवलोक्य) अयि, मरीचिके, क्वासि प्रेयसि? अरी मत्प्राणाधिके सर्वचराचर प्रतारण निपुणे आयाह्यायाहि । त्वां प्रतीक्षमाणस्य मे क्षणाः वत्सरीभूताः । (कर्णं दत्त्वा) किं कथितम्? "वत्सः प्रकम्पनः सुदूरं गत" इति? तर्हि स आयातु । तावत् स्वकलायामेव व्यापृता वर्तस्व । (परिक्रम्य पुनरपि कर्णं दत्त्वा) आः मत्प्रियसखः महारोग आयातीव । अयं कांस्यतालसदृशस्वनं कासमाम्रेडमानः शंखशकलसदृक्षं श्लेष्मनिष्ठीवमुद्गिरमाणः भल्लाकतफल संकाशैः स्फोटकदंबैः पूयशोणितस्रोतोभिः अनन्तरशरीरान्तरः श्वासधारा विस्फारित पार्श्वास्थिबन्धो महारोगः इत एवभिगच्छति ।

(यथानिर्दिष्टवेषः महारोगः प्रविशति ।)

।। द्वितीयोऽङ्कः ।।

रोषारुणाक्षः=रोषेण अरुणे अक्षिणी यस्य सः, कोपरक्तनयनः । अक्षिशब्दः बहुव्रीहौ अकारान्तो भवति । आरटन्=गर्जन् । के+इमे । पाटच्चराः=चौराः । उत्सारयितुं=निष्कासयितुं । उत्सहन्ते=उद्युक्ताः भवन्ति । प्रभवति=शक्नोति । नेपथ्यं=वेषविधानशाला । अवलोक्य=वीक्ष्य । क्व+असि ।

मरुः- (उपसृत्य) अहो नु खलु भोः क्वासीः प्रियसख! कस्को वार्ताविशेषः। आयाह्यास्यताम्! (इति हस्तसङ्केतं करोति)

महारोगः— (आसीनः) प्रभो, अयमत्रभवते सप्रश्रयः प्रणामः। अत्रभवतःकृपया यच्चिन्त्यते तत्तथैव प्रायशः साधितं भवति। तथा हि—

प्रतारणं=वञ्चना। आयाहि +आयाहि=आगच्छ। कर्णं दत्त्वा =दूरात् मरीचिकायाः शब्दः श्रूयते इति नटित्वा। स्वकला= परवञ्चनकला। आयाति+इव। कांस्यतालः=a drum made of brass. स्वनः=शब्दः। कासः=cough. आम्रेडमानः=आवर्तमानः। सदृक्षं=सदृशं। श्लेष्मा=कफः। निष्ठीवः =spittle श्लेष्मन्+निष्ठीवः=श्लेष्मनिष्ठीवः। समासे पूर्वपदानां अन्तिमो नकारो लुप्यते। यथा- राजन्+पुरुषः=राजपुरुषः। उद्गिरमाणः=उद्गमन्। भल्लातकं =marking nut. संकाशः= सदृश। स्फोटः=व्रणं। पूयं=pus शोणितं=रक्तं। स्रोतस् =प्रवाहः। अनन्तरशरीरान्तरः=व्यापशरीरः। श्वास .....बन्धः =यस्य श्वासोच्छ्वाससमये पार्श्वास्थीनि विकसन्ति सङ्कुचन्ति च, सः। विस्फारित=विकसित। उपसृत्य=समीपं गत्वा। अहोनुखलुभोः—आश्चर्यादिविकाराधिक्यद्योतनार्थं एतानि निपातानि एकीकृत्य प्रयुज्यन्ते। क्व+आसीः। कः+कः=कस्कः विस्मयादिविकाराणामाधिक्ये किं शब्दस्थविसर्गस्य सकारादेशोऽत्र विशेषः। आयाहि+आस्यताम्। हस्तसङ्केतं करोति=हस्तेन सूचयति। 'अत्रभवान्' 'तत्रभवान्' इति आदरातिशयार्थे प्रयुज्यते। भवान् इत्यर्थः। सप्रश्रय =सविनयः। यद्+चिन्त्यते।

13 मद्रेष्वद्य विषूचिका विसृमरा जगर्ति, कर्णाटके-
षूत्सृष्टाः कठिनार्बुदा, नयनरुग्जालानि चावन्तिषु ।
काश्मीरेषु विषज्वरा विदधते सांहारिकं ताण्डवं
यं देशं प्रविशामि सोऽतिकरुणं व्याक्रोशतीवानिशम् ।

अपिच—

14 भर्ता पश्यति नो प्रियामभिमुखं कोठाङ्कुरैर्दूषितां;
पत्नी नैव तथा पतिं गणयति प्रक्षुब्ध यक्ष्मामयम् ।
बाल व्याधि हतान् स्तनंधय शिशून् रात्रंदिवं क्रोशतः
शप्त्वा स्थण्डिलके क्षिपन्ति विकलाः पामातुरा मातरः।

मरुः—सखे विध्वंसात्मकस्य भगवतः कृपया सर्वमप्य-

पद्यम् 13 सारः— महारोगः स्वविजयवार्तां निवेदयति । मद्रराज्ये विषूचिका व्याप्ता वर्तते । कर्णाटकेषु कठिनार्बुदाः प्रसारिताः । अवन्तिषु नेत्ररोगाश्च विसृष्टाः । काश्मीरेषु विषज्वराः संहारताण्डवं तन्वन्ति । अहं यत्र गच्छामि स देशः अनिदं न रोदितीव, अर्थात् क्रन्दति इति मन्ये ।

विसृमरा=व्यापिनी । जागर्ति = सोल्लासं वर्तते । उत्सृष्टाः=विसृष्टाः । रुग्जालानि=रोगसमूहाः । च+अवन्तिषु। सांहारिकं=संहारात्मकं । व्याक्रोशति=रोदिति । अनिशं=सदा । वि+सृ+मर=प्रसरत् ।

पद्यम्—14 सारः— रोगाः तत्र तत्र जाग्रतीति कथितं । अपि च तत्रत्यानां जनानां भार्याभर्तृपुत्रादिबन्धमपि छेत्तुमहं प्राभवमिति वर्ण्यते । कुष्ठादित्वग्रोगदूषितां प्रियां भर्ता अभिमुखं न पश्यति । क्वचित् पत्नी क्षयबाधापीडितं स्वभर्तारं नैव वीक्षते च । इतरत्र तु पामभिरातुरा मातरः विवशाः सत्यः बालव्या-

स्मत्कुशलायैव । कुतः ।

15 दुर्भिक्षमस्ति मदभीष्टनिदेशकारि
वामा चकास्ति विपुणा च मरीचिका मे ।
आज्ञाकरोऽस्ति सविधेऽखिल भूतचक्र-
विभ्रामणेऽतिनिपुणो मम चक्रवातः ॥

विपीडनेन दिवानिशं क्रन्दतः शिशून् अङ्कात् उद्धृत्य निर्दयं भूतले विक्षिपन्ति ।

कोठः=कुष्ठं । यक्ष्मामयः=क्षयरोगः । व्याधिहतान्=रोगपीडितान् । स्तनन्धयं=स्तनं पिबन् । रात्रिन्दिवं=अहोरात्रं । स्थण्डिलके=भूतले । विकलाः=विवशाः । पामन्=scab. विध्वंसात्मकः=नाशात्मकः । सर्वं+अपि+अस्मत् कुशलाय+एव ।

पद्यम्—15 सारः— स्वकृत्यनिर्वहणे बान्धवाः सुहृदश्च सर्वथा साहाय्यं कुर्युरिति मरुः स्वयमाश्वसिति । मदभीष्टनिर्वहणे तत्परं दुर्भिक्षं मदन्तिके वर्तते । वञ्चनानिपुणा मरीचिका मे पत्नी सर्वथा मम स्वाधीना अस्ति । सर्वचराचराणां चक्रभ्रमणकर्मणि अतिनिपुणः चक्रवातो ममाज्ञानुवर्ती च विराजते ।

मदभीष्टं=मम अभीष्टं । निदेशः=आज्ञा । वामा=सुन्दरी । चकास्ति=शोभते । सविधे=समीपे । भूत...मणे=चराचरगणस्य भ्रमणे । चक्रवातः=whirlwind. अपि+च+एतत्+मे ।

अचिंतन्मे महद्भागधेयं, यदत्र,

16 साहाय्यं कुरुते सर्वरोगाणामाकरो भवान् ।
नैराश्येऽपजये क्लेशे तेजोहानावनाकुलम् ।

महारोगः—तथापि प्रभो, क्वचन मे बाधाश्च संभवन्ति ।

मरुः— कीदृशी तव बाधा?

महारोगः—यत्राहं रोगाणां बीजमावपामि तत्र तदपोहनैकतानाः काश्चन महौषधयः कृतसन्निधानाः दृश्यन्ते ।

मरुः— का नाम ताः? कुत एतत्? कथमेतत्?

महा— तदेव ममाप्यद्भुतमादधाति । तास्तु काश्चन मूलैः काश्चन फलैः काश्चन पत्रैः कुसुमैश्च तान् परिचरन्ति। मयोप्तानि कोटिशो बीजानि तत्क्षण एव नश्यन्ति । तथाहि—

पद्यम्-16 सारः— यत्र यत्र पराजयो भवति तत्र तत्र महारोगः मरोः सहायो भवतीति कथ्यते । आकारः=निधानं । हानिः=नाशः । अनाकुल=दृढ । सर्वरोगाणामाकारः भवान् नैराश्ये, अपजये, क्लेशे, तेजोहानौ अनाकुलं साहाय्यं कुरुते ।

तदपोहनैकतानाः=तेषां अपोहने दूरीकरणे बद्धश्रद्धाः । वप्+त=उप्त sown· कृतसन्निधानाः=सन्निहिताः । आदधाति=जनयति ।

17 लुठन्ति ये परिगतयातनाकुलाः
क्षमातले विलपनमन्दजल्पनाः ।
महौषधैः परिचरितास्त्वनुत्तमैः
भवन्ति ते सुखमसृणाः क्षणान्तरे ।।

मरुः— अहो नु खलु भोः कास्ताः क्षुद्रौषधयोऽस्मत्प्रतिद्वन्द्विन्यः । यदि सन्ति तादृश्यस्तर्हि ता अपि शोषयितुं अस्मत्कलत्रं अलंभवति । अथवा, अस्ति मे वत्सः प्रकम्पनः । स ताः उन्मूलयिष्यति । (नेपथ्याभियुखमवलोक्य) अरी सुन्दरि सर्वाकर्षिणि सकलापकर्षिणि चञ्चलस्वभाविनि कुत्रासि त्वं महामाये । आयाह्यायाहि । (दूरत आयान्तीं मरीचिकां दृष्ट्वा)

पद्यम्–17 सारः– ये नाम मदाक्रमणेन पीडिताः ते फलमूलादीनां परिचरणेन क्षणादेव सुखं प्राप्नुवन्ति । सर्वाङ्गेषु व्याप्तया कठिनवेदनया विवशा ये जनाः विलप्य मन्दीभूतभाषणशक्तयः भूतले लुठन्ति अर्थात् इतस्ततः परिवर्तनं कुर्वते, ते एव जनाः अनुत्तमैः महौषधैः परिचरिताः क्षणान्तरे एव सुखस्निग्धा भवन्ति । परिचरिताः+तु+अनुत्तमैः=अत्युत्कृष्टैः । अस्मादुत्तमं न किञ्चिदस्तीति अनुत्तमं । लुठन्ति=परिवर्तनं कुर्वन्ति (roll) परिगत=सर्वाङ्गेषु व्याप्त।

क्षुद्र=निस्सार । प्रतिद्वन्द्विन्य=प्रतिपक्षभूताः । तादृश्यः+तर्हि । कलत्रं=भार्या । मित्र कलत्र शब्दौ नपुंसके एव प्रयुज्येते । अलंभवति=शक्नोति । अपकर्षिणी=नाशिनी ।

18 नृत्यन्ती सा रोदसोरन्तराले
तृष्णामुष्णोत्तापिनीं वर्धयन्ती ।
आयात्यस्मत्प्रेयसी साधुशीला
वत्सस्योन्नद्धांसके न्यस्तहस्ता ।।

(ततः प्रविशति वत्सप्रकम्पनेन सह मरीचिका)
मरीचिका— (उपसृत्य) जयतु जयत्वार्यपुत्रः ।

मरुः—अहो नु खलु भोः आगतास्माकं प्रेयसी ! अयमस्माकं वत्सः प्रकम्पनः । आयाहि वत्स आयाहि । अङ्के उपविश । अद्य किं किमद्भुत कर्म कृतम्?

मरीचिका— कथमेतत्कथनीयम्? कियन्तस्तस्य विक्रियाविशेषाः । शैशवसाधारणैः चापलैस्ससुन्मीलितास्ते द्रष्टॄणां कौतुकमादधति ।

मरुः— प्रिये वत्सः कथयतु ।

पद्यम्-18 सारः— मरुः दूरादायान्तीं मरीचिकां वर्णयति - अहो! अस्मत्प्रेयसी आयाति । कथम्? आकाशस्य भूमेश्च अन्तराले नृत्यन्ती, उष्णेन अन्तर्बहिश्च तृष्णां वर्धयन्ती, वत्सस्य प्रकम्पनस्य उन्नते अंसे हस्तं विन्यस्य सा साधुशीला मत्प्रेयसी मां आयाति ।

रोदसोः=द्यावापृथिव्योः, भूमेराकाशस्य चान्तराले । उष्णेन उत्तापिनीं । उन्नद्धांसके=उन्नतस्कन्धे । अंसः=shoulder न्यस्तहस्ता=न्यस्तः हस्तः यया सा, हस्तं न्यस्तवती । न्यस्त=अर्पित । उपसृत्य=समीपं गत्वा। अङ्क=उत्सङ्ग । विक्रिया-

प्रकम्पनः— तात, अद्याहं बहुदूरं गतः । मध्येमार्गं कश्चन कोलाहलाकलितो ग्रामो नयनगोचरीभूतः । स मया मंक्षु जर्जरितः । बहवोऽर्भकाः जरठाश्च गृहभित्तिकानामन्तः प्रपिष्टाश्च । अहो कियान् श्रवणमधुरोऽसावार्तनादः । कियदाकर्षकं तदुदग्राट्टालक निकर विपाटन कटकटायमानमारटितम् । अहं तु क्वचन नृत्यन् कुहचनाट्टहासं कुर्वन् कुत्रचिन्निरन्तरं निघ्नन् हन्त! तात कीदृशी तदाऽसीत् सा मम जैत्रयात्रा!

मरुः- सुष्ठु कृतं वत्स । एवं सर्वघातुकः मन् चिरं जीव ।

मरी— ततोऽपि कथय वत्स किं किं संवृत्तमिति ।

प्रकः- अथ च श्रूयतां तात! ततो मया मध्येमार्गं काचन सवयाः कुमारिका दृष्टा । नाम्ना साऽतिवृष्टिरिति प्रथिता । हन्त! कीदृशं तस्या रूपसौभगम् । सा त्वकस्मादेव—

विशेषः=कर्माणि । समुन्मीलिताः=समुन्मिषिताः । नयनगोचरीभूतः=नयनयोर्गोचरोऽभवत्, दृष्टः । गोचरः=विषयः । मंक्षु=द्रुतं । जर्जरितः=भग्नः। अर्भकाः=शिशवः । जरठाः=वृद्धाः । प्रपिष्टाः=मृदिताः । उदग्र=उन्नत । अट्टालकः=सौधं । निकरः=समूहः । विपाटनं=ध्वंसनं । कटकटायमानं=कटकटेत्येतद्रूपं । आरटितं=शब्दः । उन्नतसौधानां ध्वंसनेन जातः कटकटशब्दः । क्वचन=कुत्रचित् । निघ्नन्=प्रहरन् । सुष्ठु=सम्यक् । घातुकः=घातकः । सवयाः (स. स्त्री. प्र. ए) समानवयस्का । नाम्ना अतिवृष्टिः इतिप्रथिता=अतिवृष्टिरिति नाम । राजा दशरथो नाम्ना अथवा नाम्ना दशरथो राजा=दशरथो नाम राजा । नु+

19 उच्चावचोद्भट तटित् प्रकटाट्टहासा
मत्त द्विपेन्द्र कर सन्निभ तीव्र धारा ।
उत्कर्दमाऽन्धतमसावृतचक्रवाला
चित्तं जहार कवलीकृतभानुबिंबा ॥

ततश्च तात अहं तु तया सहेतस्ततो विक्रीडन् बहुषु जनपदेषु क्षणमात्रेण व्यचरम् । यन्मयोत्पाटितं तत् नचिरादेव साऽप्लावयत् । समग्राणि क्षेत्राणि सपरिच्छदानि गृहाणि युगपदेव प्रणष्टानि । निरन्तं निरालंबं निराशं च सर्वत्रापि मानुष्यकमदृश्यत। हा हन्त! तात किं जानाति, कियद्वा मे मनसश्चारितार्थ्यम्?

मरु३– वत्स! चिरंजीव । पितृहितानुवर्ती वर्तस्व । (मरीचिकां प्रति) अयि चण्डिके, अद्यावामरिभिरप्यनतिक्रमणीयस्यातिथेयौ संवृत्तौ । तं कैश्चन पदविन्यासैर्गानालापैश्च रमय । वत्स! प्रकम्पन त्वमपि मातुर्द्वितीयो भव ।

मरी– (वत्सं हस्ते गृहीत्वा नृत्यन्ती)
धिधिमिद्धिमि धिधिमिद्धिमि धिधिमिद्धिमिधै३ ।

अकस्मात्=यदृच्छया । कुहचित्, क्वचित्, कुत्रचित्=कस्मिश्चित् प्रदेशे ।

पद्यम्–19 सार३— सा अतिवृष्टि३ मम हृदयमाचकर्षेति सक्षेप३ । कथं? क्रमरहितै३ उज्वलैर्विद्युद्गणैः प्रकटमट्टहासं कुर्वती मत्तगजकरप्रमाणां जलधारां वर्षन्ती, सर्वत्र पङ्कमुत्पादयन्ती, दिगन्तरालं अन्धतमसावृतं तन्वती, सूर्यबिंबं कवलीकृत्य अभिमुखमायान्ती सा अतिवृष्टि३ मम चित्तमाचकर्ष ।

प्रकम्पनः— (भ्रष्टताललयं गायन् नृत्यंश्च)
(धिधिमिद्धिमि धिधिमिद्धिमि धिधिमिद्धिमिधैः)

मरीचिका— (सर्वैकृतं नृत्यन्ती)
पूय शोणित पूतिगन्धि नितान्तमस्तु जगत्त्रयम् ।

प्रकम्पनः— (तदेव पठन् नृत्यति)

मरीचिका— (क्वचित् क्वचित् । ादविन्यसनतालादीन
च्युतेराकृष्टा वत्सं तर्जयन्ती)
गलितदशनमुखशतमथ खलतिपलितजर्जरम् ।

प्रकम्पनः— (तदेव पठन् नृत्यति)

मरीचिका— भवतु, भान्तु सर्वतोऽपि पिटककासपीनमाः ।

प्रकम्पनः— (तदेव पठन् नृत्यति)

उच्चावच=विषम, क्रमरहित । उद्भट=उग्र । तटित्=विद्युत् । मत्तद्विपेन्द्रः=मत्तगजः । सन्निभ=सदृश । कर्दमः=पङ्कः । उत्कर्दमा=पङ्कमुत्किरन्ती । अन्ध...वाला=चक्रवाल अन्धतमसं कृतवती । कबली...बिंबा। भानुबिंब कबलीकृतवती । सह+इतस्ततः । उत्पाटितं=जर्जरितं । नचिरात्=झटिति । अप्लावयत्=प्रवाहयति स्म । अद्य आवां अरिभिः अपि अनतिक्रमणीयस्य आतिथेयौ । मातुः द्वितीयः=मातुः सहायः ।

पूयशोणित इत्यादिगानस्य सारः— इदं जगत्त्रयं पूयैः रक्तैश्च दुर्गन्धि भवतु । सर्वेषामपि जनानां दन्ताः पतन्तु ।

द्वावपि— धिंधिमिद्धिमि.....धैं ः।

(नेपथ्ये) अहो सर्वमपि दग्धं विदग्धम् ।

मरुः— (कर्णं दावा) अये कस्यायं स्वरविशेषः । दुर्भिक्षमिवायाति ।

(नेपथ्ये) अहोः सर्वमपि नष्टं प्रणष्टम् ।

महारोगः— अस्मदनुकूलमिव निवेदनम् ।

प्रकम्पनः— (प्रविश्य) ज्ञात मातुलो दुर्भिक्षमितोमुखमेवायाति ।

मरु— आयातु वत्स आयातु । आशास्महे तस्मै पूर्णविजयम् ।

(उपसरद् दुर्भिक्षं दृष्ट्वा) अहो नु खलु भोः दर्शनीयैवास्याकृतिः । यतः,

---

सर्वेऽपि खलतयः पलिताः जर्जराश्च भवन्तु । सर्वत्र पिटकाः कासाः पीनसाश्च विलसन्तु । पूयः=pus. पूतिगन्धि=दुर्गन्धि । नितांतं=नितरां । च्युतिः=भंगः । आक्रुष्टा=क्रोधात् गर्जन्ती । गलित=स्रस्त, पतित । दशनः=दन्तः । मुखशतं=बहूनि मुखानि । खलतिः=bald. पलितः=जराशुभ्रकेशः । भान्तु=लसन्तु । पिटक=ulcer. कासः=cough. पीनसः=catarrh, cold दग्धं=(दह् +त)भस्मीभूतं। दुर्भिक्षं इव आयाति । इतोमुखं=अस्मदभिमुखं । दर्शनीया एव अस्य आकृतिः । दुर्भिक्ष=दारिद्र्य मरोःसखा ।

20 जीर्णैः शीर्णविवर्णवस्त्रशकलैराच्छादिता नग्नता
उन्नम्रास्थिनि गण्डके परिगतास्ते केशकूर्चाः खराः ।
स्वेदासारकपूतिगन्धि च वपुः क्षीणं च साकल्यतो
भो दुर्भिक्ष परं व्यनक्ति विजयोदन्तांस्तवैवाकृतिः ।।

दुर्भिक्षम्— (उपसृत्य हस्तौ प्रसार्य) विजितम् प्रभो विजितम् ।

मरुः— किं नाम विजितम्?

दुर्भिक्षम्— फलितम् प्रभो फलितम् ।

मरुः— किं नाम फलितं, भण । किं ते शीर्षपिण्डम्?

दुर्भिक्षम्— श्रूयताम् । अहमितो गत्वा मध्येमार्गं हत्या-माकारितवान् । सा तु सहसैव,

---

पद्यम्- 20 सारः— दुर्भिक्षमभिसंबोध्य मरुर्वदति । हे दुर्भिक्ष, तवाकृतिरेव विजयवार्तां स्फष्टीकरोति । कथमित्युदाहरति—दुर्भिक्षस्य नग्नता जीर्णैः शीर्णैर्विवर्णैश्च वस्त्रखण्डैः आवृता वर्तते । गण्डयोः द्वे अस्थिनी उन्नते दृश्येते । तादृशयोः गण्डस्थलयोः परुषाः जटिलाश्च केशाः प्रसृता दृश्यन्ते । स्वेद-प्रवाहेण क्षीणमार्द्रं च शरीरं दुर्गन्धं वमति । अतः हे दुर्भिक्ष तव आकृतिरेव विजयवार्तां स्पष्टीकरोति ।

शीर्ण=जर्जर । उन्नम्र=उन्नत । गण्डके=कपोले । परिगतः =व्याप्तः । कूर्चः=जटा । खराः=पुरुषाः । आसारकः=प्रवाहः। वपुः=गात्रं । साकल्यतः=सर्वतः । व्यनक्ति=व्यक्तीकरोति । विजयोदन्तान्+तव+एव+अकृतिः । प्रसार्य=वितत्य After

21 विसारि रसनारुण क्रकच दारुणा, दंष्ट्रिका-
परस्पर विघर्षण स्फुरित तीव्र दावानला ।
कराञ्चल विघट्टनैः स्तनितमुग्रमातन्वती
विशकट कलेबरा धृतरसाऽभ्ययान्निर्भया ।।

मरुः— अहो नु खलु भोः, निपुणः खल्वसि । ततस्ततः।

दुर्भिक्षम्— ततस्तया सह गतवता प्रतिजनपदं मया विक्रीडतम् । यो मयाऽर्धप्राणीकृतः स तया गतप्राणीकृतः । केचन हताः केचन सपरिवारं पलायिताश्च । किं बहुना ।

---

stretching- भण=कथय । हत्या=वधपिशाची । आकारितवान्=आहूतवान्, आह्वानं कृतवान्, शब्दापयामास ।

पद्यम्-21 सारः— भयङ्कराकारिणी सा हत्या मम समीपमागतवती इति संक्षेपः । कथम्? बहिःप्रसृतया क्रकचसदृश्या रक्तवर्णया जिह्वया अतिभीषणा, दंष्ट्रयोः परस्परघर्षणेन दावानलमुद्दीपयन्ती करतलयोः संघट्टनेन कठोरं मेघनिर्घोषमुत्पादयन्ती अत्युग्रस्वरूपिणी सा हत्या निर्भया सती मां सरसमभ्यागच्छत् ।

विसारिरसना=विशालजिह्वा । अरुण=रक्तवर्ण । क्रकच =saw. दारुणा=भीषणा । दंष्ट्रिकयोः परस्परविघर्षणेन स्फुरितः तीव्रदावानलः यस्याः सा । दावानलः=वन्यवह्निः । स्तनितं=मेघगर्जनं । उग्रं=कठिनं । आतन्वती=तन्वाना, उत्पादयन्ती । विशङ्कटकलेबरा=भीषणगात्री । धृतरसा=निदेश निर्वहणे तत्परा । अभ्ययात्+निर्भया । अभि+अ+या+त् । पलायिता=धाविता । किं बहुना=बहुना वर्णनेन किं प्रयोजनं, अतः संक्षिप्य कथ्यते इत्याशयः ।

22 प्रायो निर्वसनीकृताखिलजनाः निर्दग्ध केदारकाः
अन्नालाभ रुजार्तनाद विकलप्राणोत्तपद्वारकाः ।
निष्प्राणीकृत गोव्रजा निरुदकप्रोच्छुष्क कूपान्तराः
वन्ध्यीभूत विनष्ट सस्यविभवाः ग्रामाः सरूपान्तराः ।।

मरुः— सखे सुष्ठु कृतं त्वयापि । सर्वसंहारकः सन् चिरं जीव । सर्वतोमुखविजया वयं प्रवर्धामहे । तथापि सर्वे सावधानाः भवन्तु । भारतवर्षमिमं समृद्धं कर्तुं यतमानाः क्वचनात्र सन्दृश्यन्ते । अस्ति कश्चिद्धिमालयो यः खलु महौषधीभिर्महारोगं उच्चाटयन् वर्तते । तस्यास्ति काचिद्दुहिता गंगा नाम या जलसंभरणादिभिः मत्पदाक्रमणायोत्सहते । एवं तस्य कनिष्ठाश्च वर्तन्ते, विन्ध्यसह्यादयः । तेषां च सन्ति दुहितरः कावेरी गोदावर्यादयः । सर्वेऽपि ते अस्मदुन्मूलने रन्ध्रान्वेषिणोव तन्ते । यद्यस्माकमायोजनासु किञ्चनापि स्खलितं, तर्हि पुनरस्मद्गन्धोपि नावशिष्टः स्यात् । ततः सखायः सावधानाः भवन्तु ।

पद्यम्-22 सारः— मम हत्यायाश्च साहसिकविनोदेन सर्वेऽपि ग्रामा रूपान्तरं प्राप्ताः । कथमेतत् संभूतम्? ग्रामेषु प्रायशः सर्वेपि जना वस्त्ररहिताः कृताः । क्षेत्राणि भस्मीकृतानि । सर्वत्र शिशवः अन्नं अलब्ध्वा सञ्जातया रुजया सार्तानादं क्रन्दित्वा विवशाश्च वर्तन्ते । गोव्रजाः प्राणरहिताः कृताः । कूपा जलशून्याः शुष्काश्च कृताः । सस्यसम्पदो विफलाः विनष्टाश्च जाताः । एवंरीत्या पूर्वं सम्पन्नाः समृद्धाश्च ग्रामा अधुना रूपान्तरं गता दृश्यन्ते ।

23 यस्मिन् रुजो नरगणान् परिमथ्नतेऽथ
वात्या च यं भ्रमणतो विषमीकरोति ।
कालानलो दहति यं कठिनैर्मयूखै-
राक्रंस्यते स विषयो मरुणा तदैव ।।

निर्वसनीकृताः अखिलजनाः येषु ते (ग्रामाः) एवं अन्यत्रापि बहुव्रीहिसमासः । निर्वसनः=वस्त्ररहितः । केदारः=क्षेत्रं । अन्न अलाभ रुजा आर्तनाद विकलप्राण उत्तपद् दारकाः । रुजा=दुःखं । दारकाः=शिशवः ।

सर्वेष्वपि ग्रामेषु भक्षणं न लभ्यते । ततः रोगाः पीडाश्च जायन्ते, ततः आर्तनादः संभवति । तेन क्षीणप्राणाः दुःखिताः शिशवः भवन्ति । तादृशाः ग्रामाः इत्यर्थः । गोव्रजः=गोकुलं । निरुदक=निर्जल । प्र उद् शुष्क=प्रोच्छुष्क । वन्ध्योभूत=विफलीभूत । सरूपान्तराः=रूपान्तरं प्राप्ताः । समासे पूर्वपूर्वपदानां प्रत्ययाः तथा अन्तरान्तरा पदानि च लुप्यन्ते इत्यस्य अत्रत्यानि समस्तपदान्युदाहरणानि भवन्ति । यथा-अन्नस्य अलाभेन जातया रुजया संभूतेन आर्तनादेन विकलप्राणा उत्तपन्तः च दारकाः येषु ते=अन्नालाभ...दारकाः । अत्र जात उद्भूत इत्यादि पदानि समस्तदशायां न दृश्यन्ते । रन्ध्रान्वेषिणः=अवकाशं मार्गयमाणाः । स्खलितं=प्रमादः ।

पद्यम्- 23 सारः— यत्र प्रदेशे अस्माकं जनाः पदं कुर्वन्ति तत्र तत्र ममापि सान्निध्यं नियतमेव स्यात् इति मरुः प्रतिज्ञां करोति । मरुणा स प्रदेश आक्रंस्यते । कीदृशः प्रदेशः? तद्

(पुत्रमालिङ्गय) वत्स प्रकम्पन, त्वं गच्छ। वृष्ट्या दावानलेन च सह प्रतिजनपदमटन् पितुस्साम्राज्यं विशालं कुरु। महारोग! त्वमपि दुर्भिक्षद्वितीयो भूत्वा स्वकृत्यं अविलुप्तं कुरु। अये, प्रेयसि मरीचिके त्वं सर्वेषामपि भ्रान्तिमापादयन्ती मदुपान्त एव वर्तस्व।

24 विदूरगान् साधु विलोभयन्ती
वितन्वती स्वाभिमुखान् हताशान्।
अनन्तदिङ्मार्गविहारिणि त्व-
मनन्तरायं विजयस्व नित्यम्॥

॥ यवनिका ॥

विव्रियते। यस्मिन् प्रदेशे रोगाः नरगणानां मथनं कुर्वते, चण्डवातः भ्रमणं कृत्वा यं प्रदेशं सङ्कुलं करोति, प्रलयाग्निसदृशः चण्डातपो यं प्रदेशं तीक्ष्णैः किरणैर्दहति स प्रदेशो मरुणा आक्रंस्यते।

रुजः=रोगाः। मयूखः=किरणः। आक्रंस्यते=आक्रमणं करिष्यते। विषयः=देशः। अविलुप्तं=लोपरहितं अविकलं। मदुपान्ते=मत्समीपे। अटन्=सञ्चरन्। आपादयन्ती=जनयन्ती।

पद्यम्-24 सारः— मरुः स्वपत्न्याः मरीचिकाया विजयमाशास्ते। हे आकाशमार्गविहारिणि मरीचिके त्वं विदूरे गच्छतो जनान् यथेच्छं विलोभय। स्वाभिमुखमागतान् जनान् निराशान् कुरु। एवं निर्विघ्नं निरंतरं विजयस्व।

विदूरे गच्छन्ति=विदूरगाः। हताशान्=निराशान्। अन्तरायः=विघ्नः।

द्वितीयोऽङ्कः समाप्तः

एकभारते तृतीयोऽङ्कः

(यवनिकोत्क्षेपणे प्रविशति निपीतमद्य इव मदमन्थर इतस्ततः प्रस्खलन् फेनपुञ्जमुद्गिरन् समुद्यतभुजः समुद्रः)

समुद्रः— (अविस्पष्टाक्षरम्) कुत्र सा गंगा। कुत्र सा गोदावरी। क्व गता सा पर्णाशा। न खलु तासां दास्याः पुत्रीणां मद्गता चिन्ता। ता न जानते अहं कीदृशः प्रभुरस्मीति। अरी गंगे,

25 मत्पेटिकासु रत्नानि विद्यन्ते विविधानि वै।
न दद्यामेकमपि ते यावत् त्वं न मरिष्यसे॥

(परिक्रम्य) अरी, पतिव्रतासु कुलटे, कुलटासु पतिव्रते, त्वं वक्रं गच्छसि कुटिलं च गच्छसि। किन्तु मां नायासि।

तृतीयोऽङ्कः

निपीतमद्यः=मद्यं पीतवान्। मन्थरः=मन्दः। प्रस्खलन्=अस्थिरपदविन्यासः, staggering. फेनः=froth. उद्गिरन्=वमन्। समुद्यतभुजः=ऊर्ध्वं उत्सारितबाहुः। दास्याः पुत्री=पित्रा विना जाता स्त्री, जारजा। इदमतिनिकृष्टं पदं नाटकादिषु नीचाः भाषन्ते। मद्गता=मां विषयीकृत्य।

पद्यम्- 25 सारः— समुद्रो मद्यपानां स्वभावेन भाषया च निरर्थकं प्रलपति; स्वपत्नीः प्रलोभयति च। मत्पेटिकासु अर्थात्

26 विकचकुचे घनजघने सितसिकते चञ्चलालकाञ्चलिके ।
गंगे भंगासंगे चपले विमले क्व वाऽसि तनुतरले ।।

(उच्चैः) अरी उलूककोकिलकलालापिनि त्वं दर्पं करोषि? अस्ति किं ते तावान् जलविभवो यावान् ममास्ति? तव तु जल-मंगुलीपरिमाणान् मत्स्यान् वहति । मम तु द्वीपपरिमाणान् । (किंचित् स्मृत्वेव) आह! कीदृशः स मत्स्योपदंशः!,

---

मदन्तर्भागे विविधानि रत्नानि विद्यन्ते । यावत् त्वं न मरिष्य-से तावत् तेष्वेकमपि ते न दद्याम् । तव मरणानन्तरमेव दास्यन्ते इति भावः। मां नायासि= मां न अभ्यागच्छसि । न+आयासि ।

पद्यम्-26 सारः— समुद्रः गङ्गामभिसंबोध्य कथयति । मम प्राणनाथे गङ्गे त्वं कुत्र वा वर्तसे । सम्यग् विकसितस्तने, गुरु-तरजघने, सिकताभिः स्मितं कुर्वाणे, वीचिकाभिः अलकमलङ्कु-र्वति, तरंगैः भ्रूभंगं रचयन्ति, तरलशरीरिणि, चपले विमले त्वं कुत्रासि?

विकचः=विकसित । जघनः=शरीरस्य मध्यभागः । सिकता=sand. अलकः=चूर्णकुन्तलः, curls. भंगः=तरंगः । उलूकः=पक्षिविशेष., oul. कोकिलः=पिकः । उलूक इव पिक इव च मधुरमालपन्ति । दर्पः=गर्वः । अंगुलोपरिमाणान्= अंगुलीप्रमाणान् । मत्स्योपदंशः=मत्स्येन विरचितं व्यञ्जनं, Fish curry.

27 मन्दाग्निना युवतिभिर्मृदु पाचितः स
खण्डः परं मरिच धूलि विरूषितश्च ।
आलोडितश्च लशुनादिभिरुग्रगन्धैः
लालां प्रवाहयति वक्त्रगुहान्तरान्मे ॥

(त्फू त्फू इति निष्ठीवति) (पुनरपि स्मृत्वेव) किं कथयसि मया मद्यं पीतमिति । तर्हि त्वं मम बाह्वोरालिंगनायासिनी भूत्वा मामधिक्षिपसि? अथवा नायमधिक्षेपः । मम योग्यताप्रमापिणी वाणी । तथाहि—

पद्यम्-27 सारः— तस्य मत्स्योपदंशस्य केवलं स्मरणमेव मम वक्त्रे जलं प्रस्रावयतीति संक्षेपः । स मत्स्यखंडः वक्त्रकुहरात् लालां प्रवाहयति । कीदृशः खंडः? युवतिभिर्मन्दाग्निना अति मार्दवेन सम्यक् पाचितः, मरिचचूर्णैः सम्यग् मेलितः, उग्रग्रन्थैः लशुनादिभिः संपृक्तः स मत्स्यखण्डः मम मुखगुहान्तरे प्रभूतं जलं उत्स्रावयति ।

विरूषितः=मिश्रितः । आलोडितः=संपृक्तः । लशुनः= garlic. लाला=स्वादिष्ठानां भोज्यानां दर्शनेन स्मरणेन वा वक्त्रान्तरात् प्रस्रवत् जलम् । निष्ठीवति=spits. आलिंगनसुखमनुभवन्ती । योग्यताप्रमापिणी=योग्यताया मानदण्डः अर्थात् सूचिका । मद्यपानं मम योग्यतायाः मापकमित्यर्थः ।

28 हन्त! सुधांशौ राजत-
कलशाद् विकिरति सुरां सुधाधवलाम् ।
भुवनेऽत्र को मनस्वी
न खलु पिबेत्, न स्खलेत्, न वा जल्पेत्?

अरी, गंगे, कृष्णे, सिप्रे, अहं पुनः पुनराकारयामि । न खलु यूयं शृणुथ । (किञ्चित् स्मृत्वेव) अहो अन्यत् सर्वमपि स्मृतेरन्तर्हितम् । तदेकमेव मद्यसारे फेनपुञ्ज इव उद्गीर्णम् । यूयमिदानीं देशसेवां कुर्वत्यः स्वच्छन्दं पर्यटन्त्यः स्युः । तर्ह्यटत । सर्वतोऽप्यटत । वयमधुना तदर्थमनुजानीमः । अयि प्रेयसि गंगे, त्वमेवाग्रेसरा भव ।

पद्यम्-28 सारः— अस्मिन् समये ये न पिबन्ति ते मूढा एव । चन्द्रोदये सर्वेऽपि पिबेयुः, प्रस्खलेयुः, जल्पेयुश्च । अत्रोदाहरति । चन्द्र एव स्वकीयात् राजतकुंभात् सुधाशुभ्रं मद्यं विकिरति । एवं स्थिते अस्मिन् लोके को नाम न पिबेत् न स्खलेत् न वा जल्पेत्? सर्वेऽपि पिबेयुः प्रस्खलेयुः जल्पेयुश्चेत्यर्थः । सुधांशुः=चन्द्रः । सुधांशौ सुरां विकिरति=सप्तम्याः विशेषप्रयोगः । यदा सुधांशुः सुरां विकिरति तदा । विकिरति । (त. पु. स. ए) अत्र=अस्मिन् । मनस्वी (न. पु. प्र. ए) =धीरः । प्रस्खलेत्=भ्रष्ट-पदन्यासं चरेत् । जल्पेत्=निरर्थकं प्रलपेत् । आकारयामि=शब्दापयामि । शृणुथ=आकर्णयथ । अन्तर्हितं=अप्रत्यक्षीभूतं । उद्गीर्णं=उद्गतं,बहिर्गतं । स्वच्छन्दं=यथेष्टं । तर्हि+अटत । अनुजानीमः=अनुज्ञां दद्मः । अग्रेसरः=प्रमुखः । नेत्री=मार्ग-निर्देशिका । नेतृ+ई ।

29 अट निकटं स्फुटविकटं पृथुलघटे संकटे जटे जरठं
चल चपलं छलतरलं मधुरजले चञ्चले कले सकले ।

(इति निरर्थकं जल्पन् प्रस्खलन् निष्क्रामति)

(ततः प्रविशति गंगा)

गंगा— आर्यपुत्र, क्व गतो भवान्? मामाकारितवान्? अहमधुना विसृष्टनिखिलकृत्या भवत्सविधमुपागतास्मि । आज्ञापयतु किं करणीयमिति । (परिक्रम्य) हन्त! अत्रापि न दृश्यते । अलब्धार्थो गतः स्यात्? किमहं करवाणि । मया यदाचरितम् तत् तत्रभवते न रोचते । यन्मया प्रियमिति कृतं तत् प्रतिकूलम् फलति । यदाऽहं तत्रभवन्तमुपसरामि तदा स मदभिमुखं निष्ठीवति; दोर्दण्डमुद्यम्याहन्ति; कर्णकठोरं गर्जति च । किं मयात्र करणीयम् । हन्त मत्पितुर्दौर्भाग्यम । द्वे अपि दुहितरावस्य दुःखायैव । यतः,

---

पद्यम्-29 सारः—समुद्रः गंगाया यथेष्टसञ्चारार्थं अनुज्ञां ददाति इति धारणया किमपि जल्पति । अस्य पद्यस्य नास्ति कोऽपि विशेषार्थः । अट=सञ्चर । विसृष्टनिखिलकृत्या=निखिलकर्तव्यानि परित्यज्य । सविधं=समीपं । परिक्रम्य=इतस्ततश्चरित्वा। अलब्धार्थः=प्रयोजनमलब्धवान् । करवाणि=कुर्यां, तनवानि (लोट्. पर. उ. ए.) । उपसरामि=उपगच्छामि । दोर्दण्डम्=करदण्ड । दोः=करः । उद्यम्य=उन्नमय्य, ऊर्ध्वं प्रसार्य । आहन्ति=प्रहरति । दुहितरौ अस्य दुःखाय एव ।

30 व्यथां ज्येष्ठा सिन्धुर्जनयति तुरुष्कैरपहृता
कनिष्ठा त्वाश्लिष्टा सततचपलेनांबुनिधिना ।
तदप्यन्याक्रान्तेर्भरतवसुधा रक्षण विधौ
धुरीणो जागर्ति प्रसृमर विशालोन्नततनुः ।।

अपिच,

31 आवन्ध्यो विन्ध्योऽसौ जनपदशतानामवनतः,
प्रकृष्टां सह्योऽयम् कलयति च सेवामवनतः ।
कनिष्ठानामग्र्यौ मम पितुरभिन्नोज्ज्वलगुणौ
परं तौ कुर्वन्तौ सुलभविभवां भारतधराम् ।।

पद्यम्-30 सारः— स्वपुत्र्योः सिन्धुगंगयोरसुभगजीविते परितप्तोऽपि पिता हिमालयः लोकोपकारायैव प्रवर्तते इति संक्षेपः । तुरुष्कैरपहृता ज्येष्ठा सिन्धुः पितुर्व्यथां जनयति । कनिष्ठा गंगा तु सतत चपलेन अम्बुनिधिना आश्लिष्टा च । तथापि पिता हिमालयः अन्येषां आक्रमणात् भारतभूमेः संरक्षणविषये धुरन्धरो भूत्वा विशालां उन्नतां च तनुं प्रसार्य सदा जागरूको वर्तते ।

तुरुष्कैः=माहम्मदैः । व्यथा=दुःखं । अंबुनिधिः=समुद्रः । आश्लिष्टा=संबद्धा । तदपि=तथापि । आक्रान्तेः (इ. स्त्री. पं. ए) =आक्रमणात् । धुरीणः=भारवाही । प्रसृमरा विशाला उन्नता च तनुः यस्य सः । जागर्ति=जागरूको वर्तते । अपि च=न केवलमेतत् किन्तु अन्यदप्यस्तीत्यर्थः ।

पद्यम्- 31 सारः— हिमवतः कनिष्ठौ विन्ध्यः सह्यश्च यथाशक्ति भारतस्य सेवां तन्वाते । तथाहि, अयं विंध्यपर्वतः

हन्त! अहमीदृशी मन्दभाग्या संवृत्ता (इति रोदिति)

(ततः प्रविशति हिमालयः)

हिमालयः— (गङ्गां दृष्ट्वा) वत्से किमेवमेकाकिनी भूत्वा किमपि प्रलपन्ती विलपन्ती च तिष्ठसि? किं ते कदननिमित्तम्?

गङ्गा— (उपसृत्य) तात वन्दे। मम तु,

32 कदनं खलु शाश्वतः प्रवाहः सिकता हर्ष इवान्तरान्तरा तम्।
गहने विपिने निराश्रयाऽहं रुदती हन्त! नये दिनं कथञ्चित् ॥

हिमालयः— वत्से, शान्ता भव। न खलु देशसेविकानामिदं कातर्यमुचितम्। मोदाः खेदाश्च ताः न विकुर्वन्ति। सर्वदैव ताभिः परार्पितसर्वस्वाभिर्भवितव्यम्। तासां तु सर्वाणः

ग्रामशतानां रक्षणात् सफलः कृतकृत्यश्च वर्तते। अमौ अवनतः अर्थात् विनतः सद्योऽपि प्रकृष्टां सेवां करोति मम पितुः समानगुणौ कतिपयगुणप्रधानौ नौ द्वावपि पर्वतौ इमां भारतभूमिं विभवसमृद्धां कुर्वन्तौ काशिनानं वर्तेते।

अवमध्यः=सफलः सद्योजनः। ग्रामशतानां+अवनतः =अवनात्. रक्षणात्। कलयति=कुरुते। सर्वां+अवनतः= नम्रः। आद्यपादे अवन+तः इति तप्रत्यन्तमव्ययम्। द्वितीये तु अव+नम्+त इति क्तान्तः शब्दः। अग्रयौ=मुख्यौ। अभिन्नाः उज्ज्वलाश्च गुणा ययोस्तौ। कदनं=दुःखं।

पद्यम्-32 सारः— गंगा स्वानुभवं प्रस्तौति। मम जीविते निरन्तरः शाश्वतश्च यः प्रवाहोऽस्ति स प्रवाहो मम मनसि

संकटा, प्रायशो मनोरथा विकलाश्च भवन्ति। तथापि ता अविचलितचित्तवृत्तय एव दृश्यन्ते। त्वमधुना कदनाभिभूता दृश्यसे। कुतस्ते तादृशी धैर्याभिघातिनी व्याकुलता जाता। कथय विस्रब्धम्।

गङ्गा— अद्याहं वंगदेशावधीनां विषयाणांअनावृष्टि संजातां तृष्णां निर्वापयितुं गता। सन्नान् केदारान् प्रसन्नान् कुर्वती सन्तप्तान् कृषीवलान् संतृप्तानातन्वती निर्जलान् जलाशयान् सुलभजलानाकलयन्ती प्रतिग्रामं प्रतिजनपदं पर्यटन्त्यासम्। तदा आर्यपुत्रः आगत्य मामाकारितवान्। यदाहं तच्छ्रवणादितोमुखी न्यवर्ते तदा तत्रभवानितोऽपि विनिर्गतः। धिङ् मामसुलभसौभगां भर्तुरनुवर्तने। (रोदिति)

हिमालयः— (दुहितरं सान्त्वयन्) वत्से·

सर्वदा वर्तमानम् दुःखमेव। तत्प्रवाहमध्ये तत्र तत्र नैमिषिका हर्षा इव काश्चन सिकताश्च दृश्येरन्। किन्तु मम शाश्वतरूपम् दुःखमेव। एवम् दुखात्मकप्रवाहरूपिण्यहम् अतिगहनेषु काननेषु निराश्रया भूत्वा विलपन्ती कथञ्चिदपि दिनानि नयामि।

शाश्वतः=सनातनः, निरन्तरः। सिकता=नदीप्रवाहमध्ये तत्र तत्र विद्यमानाः अल्पतमाः द्वीपाः। (small sandy lands·) तमन्तरा=तस्यमध्ये। गहने=सान्द्रे। कातर्यं=भीरुत्वं। विकुर्वन्ति=विकारकारणानि भवन्ति। ताभिः परार्पितजीविताभिः भवितव्यं=ताः परार्पितजीविताः भवेयुः। सरणिः=मार्गः। सकटा=विषमा। विकलाः=अपूर्णाः। अविचलिताः चित्तवृत्तयः

33 सुमुखि रुदिहि मैवं बद्धवात्सल्यभावम्
जनकहृदयमेवं मा कृथा निष्प्रभावम् ।
प्रशमयितुमभूवं यः क्षमः शत्रुदावं
विसृजति स निकामं धीरमात्मस्वभावम् ॥

अथ च वत्से त्वया स्वपतिं प्रति नैवं संकोचः कार्यः । यत् सत्यं, स मे जामाता सदा प्रक्षुब्धः सततं चञ्चलश्च दृश्यते । तथापि तस्य तद् गाम्भीर्यं अस्मद्राष्ट्रमन्यैरप्रधृष्यं करोति । अपि च पश्य वत्से, स कदापि नातिक्रान्तमर्यादो वर्तते । परिघसदृशान् बाहुदण्डानुन्नमयन् आकाशमुद्भेदयन्निव उच्चकैर्गर्जन् अरिकुलं विभीषयन् सोऽस्माकं कर्मभूमेरंगरक्षको भूत्वा सेवामातनुते । त्वं तस्य बहिश्चाञ्चल्यमेव जानीषे । नास्य गाम्भीर्यं महिमान वा । पश्य,

---

यासां ताः । अभिभूताः=पराभूताः । धैर्याभिघातिनी=धैर्यनाशिनी । व्याकुलता=परवशता । विस्रब्धम्=सविश्वासं । विषयः=देशः । अनावृष्टिः=वर्षाभावः। निर्वापयितुम्=दूरीकर्तुं, नाशयितुं । सन्नान्=क्षीणान् । आतन्वती=कुर्वती । पर्यटन्ती+आसम् । आकारितवान्=आहूतवान्, शब्दापितवान् । इतोमुखी=इदं स्थानमभिमुखीकृत्य । धिक्+मां । 'धिक्' इत्यव्ययं द्वितीयान्तेन सह निन्दार्थं प्रयुज्यते । धिङ् मां=अहं निन्दनीया, अथवा मम जीवितं निन्द्यम् ।

पद्यम्- 33 सारः- हे वत्से रोदनेनालम् । धीरमपि मां मैवमधीरं कुरु । न खलु त्वयैवं रोदनं कार्यं । यद्येवं रुद्यते तर्हि वात्सल्ययुक्तमिदं तव पितुश्चित्तं दुर्बलं स्यात् । योऽहं शत्रुरूपं

34 द्वीपानामयुतं बिभर्ति यदयं नित्यंचलो निश्चलं,
क्रय्याणां यदितस्ततः प्रणयनैर्लोकानयं सेवते ।
यज्जातोऽयमनुत्तमोन्नतकुले यस्मात् स्म सञ्जायते
शान्ताभोधिरपीह तच्छ्वशुरतामापाद्य तुष्याम्यहम् ॥

(नेपथ्ये गानं श्रूयते)

जन गण रमणी भारत धरणी जयति निरन्तर मङ्गलजननी ।
तव मन्द्रं जयवाद्य विशेषं प्रथयति जलनिधिरमदृशघोषम् ।

(जनगणरमणी.....)

दावानलमपि प्रशमयितुं शक्तोऽभूवं सैष तव पिता अधुना रुदतीं त्वां दृष्ट्वा स्वाभाविकमात्मनोधैर्यं मुञ्चति ।

रुदिहि=क्रन्द (लोट्. पर. म. ए)। बद्धः वात्सल्यभावः यस्मिन् । मा कृथाः=माकुरु, न करणीयम् । मा=न । क्षमः=शक्तः। शत्रुदावः=शत्रुरूपो दावाग्निः । विमृजति=त्यजति । निकामम्=नितराम् ।

यत्सत्यं=सत्यमेव । जामाता=दुहितृपतिः भर्ता । अस्मद्भर्तृ+अन्यैः+अधृष्यं=अनाक्रमणीयम् । नातिक्रान्तमर्यादः=सीमानमनुल्लंघितवान् । मर्यादा=सीमा । परिघः=अर्गलः, Iron beam used for shutting huge palace gate. जानीषे=जानासि । उद्भेदयन्=विदारयन् ।

पद्यम्-34 सारः— बहुविधलोकसेवाः कुर्वन्नस्तस्य समुद्रस्य श्वशुरो भूत्वा अहं तुष्टोऽस्मीति हिमालयः वदति । सदा चञ्चलोऽयं समुद्रः चतुःसहितान् अनेकान् द्वीपान् बिभर्ति । क्रयविक्रय-

गङ्गा—(कर्णं दत्त्वा) सिप्रा पर्णाशा चायात इव ।

(पुनरपि नेपथ्ये)

कुसुमैरविरल परिमल मिलितैस्तरु ततिरर्चति नव मधु कलितैः ।
द्वीप द्वीपमयादसमानं यस्यास्सुमहितधर्मवितानम् ।

(जनगणरमणी.....)

(सिप्रा पर्णाशा च गायत्यौ प्रविशतः)

मानुष लक्षानविकल शिक्षानकृत समान् या कर्मसु दक्षान्
सा राजति भुवनैकविभूषा विदलित जन गण मानस दोषा ।

(जनगणरमणी.....)

हिमालयः— अहो श्रवणसुखं गानम् । श्रुत्वा सर्वमपि विस्मर्यते । अयं खलु गानस्य प्रभावः ।

वस्तूनां इतस्ततः प्रेषणैः अयं लोकसेवां कुरुते । यस्मात् समुद्र-वंशात् शान्तसमुद्रोऽपि जातः तस्मादेव वंशान् तव भर्ता वङ्गसमुद्रोऽपि समजायत । तादृशस्य परोपकर्तुः कुलीनस्य समुद्रस्य श्वशुरपदं प्राप्य अहं अतितरां तुष्यामि ।

अयुतम्=दशसहस्रं । बिभर्ति=धरति । यत्=यस्मात् । क्रय्याणां=क्रयविक्रयवस्तूनाम् । प्रणयनैः=प्रेषणैः । यत्+जातः +अयं+अनुत्तम... अनुत्तम=अत्युत्कृष्ट । तस्य श्वशुरतां । तत्+श्वशुरतां=तच्छ्वशुरतां । आपाद्य=प्राप्य ।

गानम्— जनगणरमणी=जनानानन्दयन्ती । तव मन्द्रं...घोषम्= समुद्रः तव जयवार्तां तरंगरूपं वाद्यमाहत्य प्रख्यापयति । प्रथयति =विस्तारयति । च+आयतः+इव । कुसुमैः...कलितैः । वृक्षसमूहः सुगन्धिभिः मधुसङ्कलितैः पुष्पैः भारतमातरमर्चति । अविरल=अनल्प । द्वीपम्...वितानम्=यस्याः असदृशं सुमहित

35 व्यावर्तितेन्द्रियगणं विषयान्तरेभ्य-
श्चित्तं करोत्यविरतात्मसुखानुविद्धम् ।
निद्राति यद्विकसति प्रविलीयतेऽथ
विभ्राजते विहसति क्षणमन्तरेण ॥

पर्णाशा— (हिमालयं निरीक्ष्य सादरमात्मगतम्)

36 बाह्यैः शुभांगैरवदातभावं तथान्तरंगेण गभीरभावम् ।
व्यनक्ति, यद्यप्ययमप्रधृष्योऽप्याभाति सर्वैस्सततमभिगम्यः

विस्तृतं च धर्ममहत्त्वं प्रतिद्वीपं प्राप । अयात्=ययौ । मानुष-
जथान्=या भारतमाता अत्रत्यान् सर्वान् मानुष समूहान् सम्यक्
शिक्षितान् कृत्वा तत्तत्कर्मसु समर्थान् अकरोत् । अविकला
(पूर्णा) शिक्षा येषां ते । अकृत=अकरोत् । (लुङ् आ. प्र. ए
अकृत) समान्=सर्वान् । विदलित जनगणमानसदोषा=जनगण-
मानसदोषान् दूरीकृतवती ।

पद्यम्-35 सारः— गानं अलौकिकेनानन्देन चित्तं मोह-
यति । तद् आकर्णयतां इन्द्रियाणि अन्यविषयेभ्यो व्यावर्त्य चित्त
मन्ततपरमानन्दनिलीनं करोति । तत्तादृशं चित्तं गानश्रवणसमये
कदाचिद् निद्रातीव, कदाचित् विकासं प्राप्नोतीव, कदाचिद् विलय
प्राप्नोतीव, उज्वलतीव, विहसतीव । गानश्रवणन चित्तमीदृश
विकुरुते । व्यावर्तिता इन्द्रियगणा येभ्यः तद् (चित्तं) व्यावर्तित
=परावर्तित। विषयः=इन्द्रियैर्गृह्यमाणं वस्तु । अन्ये विषया=
विषयान्तराणि । अविरतेन आत्मसुखेनानुविद्धं । अविरतम्=
निरन्तरं । अनुविद्धं=सहितं, संबद्धं ।

पद्यम्-36 सारः— पर्णाशा हिमालयम् निरीक्ष्य प्रस्तौति ।

सिप्रा – (गङ्गां निरीक्ष्य सकौतुकमात्मगतम्)

37 उपेयिवांसो द्रवतां प्रायो गुणगणाः पितुः ।
पुत्र्याः प्रवाहाः सञ्जाताः भुवनत्रयपावनाः ॥

(द्वे अप्युपसृत्य) पितृदेव, वन्दावहे ।

हिमालयः— वत्से लोकप्रिये भवतम् । अन्यजीवनार्थायैव युवयोर्जीवनानि भवन्तु ।

पर्णाशा— शिरसा धार्यते सानुग्रहं वाक्यम् । फलितमावयोर्मनोरथैः ।

हिमालयः— अपि कुशलं युवयोर्विषयाणाम् ?

पर्णाशा— तात, अयमेक एवावयोः क्लेशहेतुः ।

हिमालयः— कथमिव?

पर्णाशा— कथमावयोर्विरलभागधेययोर्विषयेषु कुशलं भवति? यत्र स मरुमरीचिकाजानिश्शास्ता वर्तते ।

हिमालयस्य बाह्यावयवाः तस्य परिशुद्धस्वभावम् व्यञ्जयन्ति । तथा अन्तरगेण गांभीर्यं च प्रतीयते । तथैवायम् बाह्यदृष्टया अप्रधृष्यः अर्थात् अनभिगम्य इव प्रतिभाति । किन्तु स सर्वेषामप्यभिगम्यश्च वर्तते ।

अवदातभावम्=विशुद्धस्वभावम् । व्यनक्ति=स्पष्टीकरोति । यद्यपि+अयं+अप्रधृष्यः+अपि+आभाति । आभाति=प्रतिभाति (seems)

पद्यम्-37 सारः— सिप्रा गंगां निरीक्ष्य स्वयं चिन्तयति । पितुर्हिमालयस्य गुणगणाः द्रवीभूय पुत्र्या गङ्गाया भुवनत्रय-

हिमालयः-- आः! मरुर्युवयोर्विषयान् पुनरपि व्यापादयितुं उद्युक्तः? मा मैवम्। असकृत् स मयोद्बोधितः 'अविकृतं वर्तस्वे' ति। न स मां गणयति? अस्तु, अहमधुनैव जामातरं सागरमामन्त्रयामि। स एवार्तानामेकावलम्बः। तद्युवामधुना स्वविषयमेव प्रतिनिवर्तेथाम्। अपारगाधहृदयः स यावत्कालं वर्तते तावत् अस्माकं नास्ति कुतोऽपि भयस्यावकाशः। अहो, विचित्राणि तस्य वृत्तानि।

38 क्षुद्रं परान् स्वमवबोध्य बहिश्चलत्वात्
क्षुद्रान् परान् वितनुतेऽप्रतिमात्मसत्त्वः।
उच्चावचा हि महतां विविधा विलक्षा
विस्मापका दुरवगाहतमाः स्वभावाः॥

पावनाः प्रवाहा जाता इति मन्ये।

उपेयिवांसः=प्राप्ताः। 'इ' धातोः क्वसुप्रत्ययान्तः। द्रवतां=द्रवत्वम्। पावनाः=पुनानाः, शुद्धीकुर्वत्यः।

फलितमावयोर्मनोरथैः=आवयोर्मनोरथाः फलिताः। विषयाणाम्=देशानाम्। व्यापादयितुं=नाशयितुं। मा मैवं न संभाव्यं। अविकृतं=विकाररहितं, यथातथं। एव+आर्तानां+एकावलंबः। तद्+युवां। वृत्तं=चरितं।

पद्यम्-38 सारः— सदा चञ्चलस्वभावोऽयमंबुधिः अतिक्षुद्र इति जना मन्यन्ते। एवं जनानां चिन्तां जनयितुमेव स सततं बहिश्चलो वर्तते। वस्तुतः, जनानां एवं भ्रममुत्पादयन् स तानेव

(हिमालयः पर्णाशा, सिप्रा च निष्क्रामन्ति)

गङ्गा— (अञ्जलिं बद्ध्वा) आर्यपुत्र! क्षमस्व मां अशुद्धत्रिकरणाम्। (सगद्गदं रोदिति)।

(यवनिका)

क्षुद्रान् करोति। समुद्रसदृशानां महतां स्वभावा एवमुच्चावचा भवन्ति। ते अन्यैरवगन्तुं न शक्याः। बहुविधास्ते परेषां विस्मयं च जनयन्ति।

क्षुद्रः=अन्तस्सारशून्यः। अवबोध्य=प्रबोध्य, संज्ञाप्य। बहिश्चलत्वात्=बाह्यचलनस्वभावेन। अप्रतिमं आत्मसत्त्वं यस्य सः। अप्रतिम=असदृश। सत्त्वं=शक्तिः। उच्चावचाः=विषमाः, क्रमरहिताः। विलक्षाः=असाधारणाः। दुःखेन अवगाहितुं योग्याः=दुरवगाहाः। अवगाहितुं=ज्ञातुं। दुरवगाहतमाः=अत्यन्तमज्ञेयाः। अशुद्धत्रिकरणां=मनोवाक् कर्मसु अशुद्धाम्।

तृतीयोऽङ्कः ॥

एकभारते चतुर्थोऽङ्कः

(ततः प्रविशति चिन्ताकुला गङ्गा)

गङ्गा— (आत्मगतम्) आर्यपुत्र! प्रसीद मयि। यन्मयाऽपराद्धं, क्षमस्व। त्वय्यहमशुद्धत्रिकरणा जाता। मम त्वीदृशी दशा।

39 प्रालेय शैल शिखराद् गलिता, पयोधेः
प्राणप्रिया, परिहरामि तृषां जनानां।
साऽहं दहामि नितरामधुनैक्यतृष्णा-
तीव्रोष्मणा महित भारत भूतधात्र्याः॥

आर्यपुत्र, तव दासीं मामनुशाधि। तात हिमालय, पुत्रीमनुगृहाण। अस्माकं अधिष्ठात्र्या एकतापादकं कञ्चन मार्गं प्रदर्शय येनाहं एतां समृद्धां कर्तुं शक्नुयाम्। एवमनवशिष्टकर्तव्यान्तरा च स्याम्। (परिक्रम्य विचिन्त्य च) कथमस्या आर्षभणितिभिरेकीकृताया गिरिजलधिभिरन्यतोऽसंपृक्तायाः अस्मत्

चतुर्थोऽङ्कः

त्वयि अहं अशुद्धत्रिकरणा। तु ईदृशी।

पद्यम्—39 सारः- गंगा स्व विचित्रदशां प्रति शोचति। हिमालयात् अहं प्रवहामि। जलधेः प्राणप्रिया चास्मि। जनानां तृष्णां अहं परिहरामि। तादृशी अहं भारतमातः ऐक्यतृष्णाया ऊष्मणा अधुना दहामि। इदं विचित्रमेव।

